 ISSN 976-8645

# संस्कृतशिक्षणाय सम्बर्द्धनाय प्रचाराय च उपायाः

**हेमन्तकुमारजोशी 'शिवः'**[305]

संस्कृतं नैवास्माकं देशस्यापितु सकलविश्वस्यैव प्राचीनतमा भाषा; अस्याः भाषायाः संरक्षणे पोषणे चावलम्बितं भारतीयसंस्कृतेः स्वरूपस्य संरक्षणं पोषणञ्च। यावन्नु विद्यते संस्कृतं तावन्ननु भारतम्। संस्कृतं विना भारतं नैव कल्पयितुं शक्यते। सुविदितमेव सर्वेषां, यदीयं गीर्वाणवाणी सुरभारती संस्कृतभाषा न केवलं भारतीयसंस्कृतेः, अपितु समस्तराष्ट्रस्य एकताया अपि आधारत्वेन विराजते। भारतीयसंस्कृतिज्ञानविज्ञानायुर्वेदवेदोपनिषदारण्यकग्रन्थानामाधारभूता भाषा संस्कृतमेव। विश्वप्राचीनतमवेदवेदाङ्गपुराणदर्शनाचारग्रन्थाः व्यासभासकालिदासमाघादीनां काव्यकृतयः, विविधं विज्ञानकलाकौशलं बहूनि अन्यान्यपि शास्त्राणि अस्यामेव भाषायां विरचितानि सन्ति। समस्तं ज्ञानविज्ञानसम्पन्नं प्राचीनकालादेव इदं भारतराष्ट्रं स्वगौरवस्य समृद्धेश्चरित्रस्य दर्शनस्याध्यात्मिकस्य च यशः पताकां अस्या देवभाषायाः प्रभावादेव विश्वाकाशे समुत्तोलयद् विराजतेतराम्।

इमां भाषामधीयाना विश्वजना अत्रागत्य स्वं स्वं चरित्रं शिक्षन्ते स्म। यथोक्तं मनुमहाभागेन–

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**

**स्वं स्वं चरित्रं शिक्षेरन् प्रथिव्यां सर्वमानवाः।।**[1]

वर्तमानशिक्षायाः प्रमुखोद्देश्यं ''राष्ट्रिय–एकता'' इति पौनःपुन्येन उच्चैः समुद्घोषितमस्ति। राष्ट्रस्य पुरतः अद्यतनः ज्वलन् प्रश्नः नाम ''राष्ट्रस्य एकतात्मता'' एव। अस्य प्रश्नस्य सम्यग् उत्तरं केन्द्रशासनेन स्वयमेव प्रदत्तमस्ति, यत्– ''संस्कृतभाषा एव प्राचीनकालादारभ्य भारतराष्ट्रस्यास्य सांस्कृतिकैकात्मार्थं प्रभावपूर्ण'' इति। नवीनशिक्षानीतौ संस्कृतभाषायाः शिक्षणम् उपादेयता च प्रतिपादिते स्तः– **भारतीयभाषाणां विकासार्थं तथा च राष्ट्रस्य सांस्कृतिकैकात्मार्थं संस्कृत भाषैव महत्त्वपूर्णा'' इति।**[2]

संस्कृतं भारतस्य शास्त्रीयभाषा वर्तते। **भाषेयं सङ्गणकयन्त्रस्य साफ्टवेयर् इत्यस्य च कृते सर्वोत्तमा भाषा मता नासावैज्ञानिकैः।**[3]

---

[305] शोधच्छात्र राष्ट्रियसंस्कृतसंस्थानम् लखनऊपरिसरः

 ISSN 976-8645

संस्कृतभाषाया: अखण्डप्रवाह: पञ्चवर्षसहस्रवर्षेभ्य: प्रवाहमानो दृश्यते आधुनिकविदुषां मतानुसारम्। भारतेऽस्मिन् आर्यभाषाया: व्यापकत्त्वात् सर्वाधिकं सम्पन्नस्वरूपं वर्तते। अनेन माध्यमेन भारतस्योत्कृष्टतमा मनीषा, प्रतिभा, अमूल्यचिन्तनं, मननं, विवेक:, रचनात्मकता, सर्जना, वैचारिकप्रज्ञायाश्चाभिव्यञ्जनं सञ्जातमस्ति। अनया भाषया सर्वेषु क्षेत्रेषु ग्रन्थनिर्माणस्याद्यापि क्षीणाधाराऽवछिन्नरूपेण प्रवहति। भाषेय बहुभिर्जनैरद्यापि सम्भाष्यते। ग्रीकलैटिनमृतभाषाभ्यां भिन्ना स्थितिरस्ति संस्कृतभाषाया:, अतएव अमरभाषानाम्नापि ज्ञायते संस्कृतभाषेयम्।।

संस्कृतभाषा पाणिनियकृतनियमितव्याकरणसूत्रै: परिष्कृता। पतञ्जलिकाले आर्यवर्तस्य शिष्टजनानां व्यावहारिकी भाषा संस्कृतं बभूव–

**''गादर्शात्प्रत्यक्कालकवनादक्षिणेन हिमवंतमुत्तरेण वारियात्रमे– तस्मिन्नार्यवर्ते आर्यनिवासे।''**[4]

उल्लेखानुसारं संस्कृतं समग्रभारतस्य द्विजातिवर्गविद्वत्समाजयो: सांस्कृतिकी विचार प्रदात्री च भाषाऽभवत्।

भारतीयसंस्कृते: संस्कृतभाषायाश्चाविनाभावसम्बन्ध:। काश्मीरत: कन्याकुमारीपर्यन्तं सकलसंस्काराणामाधार: संस्कृतमेव। भारतीयसंविधानस्य सर्वासां भाषाणामुपरि संस्कृतस्यैव प्रत्यक्षत: परोक्षतो वा प्रभावो दरीदृश्यते। देशेऽस्मिन्नधुना संस्कृतशिक्षणं परमावश्यकम्।

संस्कृतशिक्षणसन्दर्भे डॉ.हरिनारायणदीक्षितवर्य्यैर्लिखितं स्वविरचितमहाकाव्ये–

**रक्षितुं न च शक्यन्ते विना संस्कृतशिक्षणम्।**

**सभ्यतासंस्कृतिर्लोके भारतस्य च शेवधि:।।**[5]

तत: परं विनिवेदिता भारतवासिनो यत् सर्वैरेव संस्कृतशिक्षणाय सहयोगो विधेय:–

**संस्कृतस्य च शिक्षायै तस्माद्भारतवासिभि:।**

**सहयोगो विधातव्यो वपुषा मनसा श्रिया।।**[6]

संस्कृतशिक्षणोपायत्वेन आदौ निखिलेऽपि भारतवर्षे प्रथमसंस्कृत– आयोगसदस्यै: प्रदत्तं त्रिभाषासूत्रमाचरणीयम्–

(क) मातृभाषा (अथवा प्रादेशिकभाषा)

(ख) आंग्लभाषा

(ग) संस्कृतभाषा अथवा काऽप्यन्यासांस्कृतिकभाषा

त्रिभाषासूत्रैः सह संस्कृतभाषायाः पाठ्यक्रमोऽप्यायोगेनास्ति निर्धारितः। आयोगेन प्रस्तावितं यत् षष्ठकक्षातः प्रारभ्य सर्वेष्वपि विद्यालयेषु संस्कृतभाषाध्ययनं भारतशासनेन सम्पूर्णेऽपि राष्ट्रेऽनिवार्यरूपेण कार्यम्। छात्रेषु संस्कृताध्ययनं प्रति रुचिमुत्पादयितुं षष्ठकक्षातः पूर्वं संस्कृतभाषायाः सुभाषितानां नीतिकथानाञ्च अध्यापनस्य व्यवस्था पाठ्यक्रमे पञ्चमकक्षापर्यन्तं शासनेन कार्या।[7]

संस्कृतशिक्षणक्षेत्रे संस्कृतं ''भाषात्वेन'' एव द्रष्टव्यं, न तु विषयाकरेण।

भाषायाः चत्वारि कौशलानि भवन्ति–श्रवणं, भाषणं, पठनं, लेखनं चेति। तत्र श्रवणं पठनं चावगमनात्मकं भवति भाषणं लेखनं चभिव्यक्यामकं भवति। चतुर्णामपि कौशलानां यदा प्राधान्यं भवति तदैव शिक्षणं परिपूर्णं भवति।

संस्कृतशिक्षणाय चत्वार उपायाः प्राधान्येन वर्तन्ते। ते च–

**(1) पाठयिताशिक्षकः** **(2) पाठनपद्धतिः**

**(3) पाठ्यक्रमः** **(4) परीक्षा**

**1. पाठयिता शिक्षकः**– वस्तुतस्तु कस्याञ्चदपि शिक्षणप्रक्रियायां शिक्षकस्य भवति विशिष्टं स्थानम्। यतोहि शिक्षकस्य कलाकौशलयोरभावे शिक्षणस्य वाञ्छितं साफल्यं नैव लभ्यते। आदौ संस्कृतशिक्षणाय शिक्षकस्य विषयज्ञानेन समं धाराप्रवाहत्वेन संस्कृतसम्भाषणं भवेत्। एतत्सन्दर्भे तु महाकविकालिदासोऽपि विलिखति यत् यस्य शिक्षकस्य विषयज्ञानं सम्प्रेषणञ्चोभयमपि समीचीनं स एव शिक्षकाणां धुरिप्रतिष्ठापयितव्यः। सामान्यतस्तु कस्यचित् शिक्षकस्य विषयज्ञानं दृढतरं न, सम्भाषणकौशलम् तथैव कस्यचित् सम्भाषणकौशलमुत्तमं तु विषयज्ञानं नोत्तमम्, अतः सर्वोत्तमः कुशलशिक्षकः असौ मन्यते यस्य उभयमपि साधुर्भवति– यथोक्तम्–

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था, संक्रान्तिरन्यस्य विशेषयुक्ता।**

**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव।।**[8]

संस्कृतं संस्कृतमाध्यमेन एव पाठनीयं सर्वत्र। संस्कृतमाध्यमेन पाठः तदैव सफलो भवति, यदा शिक्षकः काश्चन गुणान् आत्मसात्करोति। ते च गुणाः–

* शिक्षकेण धाराप्रवाहितया संस्कृते सम्भाषणसामर्थ्यं सम्पादनीयम्।

* भाषा अवगमनयोग्या प्रयोगयोग्या चेति द्विविधा। यदि अध्यापकः प्रयोगयोग्यया भाषया सरलया वा व्यहरति तमनुकुर्वन्ति छात्राः प्रमोदेन। अथवा तेन अवगमनयोग्यया वा भाषया व्यवहरणीयम्।

* संस्कृतमाध्यमेन पाठनार्थम् अध्यापकेन विविध-पद्धतीनां ज्ञानं प्राप्तव्यं भवति। न केवलं ज्ञानम्, अपि तु प्रयोगकौशलमपि आत्मसात्करणीयम्।

* माध्यमिक-कक्षापर्यन्तं संस्कृतशिक्षणं प्रत्यक्षविधिनापि कारणीयम्।

* संस्कृतशिक्षकैः अधिकाधिकं संस्कृतमेव सम्भाषणीयं विद्यालयेषु।

**2. पाठनपद्धति** – विशेषप्राधान्यं भवति संस्कृतमाध्ययेन पाठनपद्धतेः। पद्धतिमवलम्ब्य एव पाठनस्य साफल्यं सिद्ध्यति। प्राथमिकस्तरे प्रत्यक्षपद्धतिः लाभाय भवति। श्लोकपाठावसरे आकाङ्क्षापद्धतिः लाभकरी। छात्राः संस्कृतेन सम्भाषणं कुर्युः, वाक्यानि च रचयितुमात्मविश्वासं प्राप्नुयुः तथा करणार्थं तु "सम्भाषणशिविराणि" नितरां लाभकराणि इति तु सम्प्रति प्रयोगसिद्धः विषयः। अतः वर्षारम्भे वर्षान्ते च विद्यालये सम्भाषणशिविराणाम् आयोजनं विधाय प्रयत्नो विधातुं शक्यः संस्कृतवातावरणनिर्माणे।

**3. पाठ्यक्रमः**– सम्भाषणमाध्येन संस्कृतं पाठनीयं चेदनुकूलं पाठ्यपुस्तकमपि स्यादेव।

* पाठ्यपुस्तकं सम्भाषणणोपयोगि भवेत्।

* सरला एव भाषा सर्वेषु स्तरेषु भवेत्।

* संस्कृतवाङ्मये केचन दुर्बोधा ग्रन्था अपि सन्ति, ते संस्कृतविद्वद्भिः सुललितसंस्कृते प्रतिपादनीयाः।

* भाषागतसारल्यमपि भवितव्यम्। अस्माभिर्नवनीतमिव लोभनीयं सुकोमलं मधुरं ललितं संस्कृतं प्रयोक्तव्यं न तु नारिकेलवत् कठिनम्। प्राकृतमेव रूपं रोचते लोकाय न त्वलङ्कारभारभरितं गतिशून्यम्।

**"कान्तासम्मिततयोपदेशयुजे"**[9]

कान्ता तु यदा ललितां, मधुरां, सुस्पष्टां, सरलां, कर्णप्रियां वाचं वक्ति तदैव सा मनोरमा भवति।

* व्याकरणगतसारल्यमपि भवितव्यं पाठ्यक्रमे। सूत्र-प्रक्रिया-लकार-धातुप्रयोग-सन्धि-आदीनां प्रयोगः क्लिष्टतरो न भवेत्, अपितु येषामवश्यकता वर्तते संस्कृतशिक्षणे तावन्त एव सरलरीत्या पाठनीयाः।

**4. परीक्षाः** - परीक्षाक्रमः योऽस्ति अधुना, छात्रस्य ज्ञानं सामर्थ्यञ्च ज्ञातुं नास्तीति अलम्। पठनं चतुर्विधकौशलम् अवलम्ब्य भवति, इत्यतः परीक्षा अपि चतुर्विधकौशलान् आधारीकृत्य एव भवेत्। इतोऽपि मौखिकपरीक्षा अपि भवेयुः। एवं शिक्षकः, पाठ्यक्रमः, पद्धति, परीक्षा चेति चत्वारोऽपि अंशा यदा परस्परपूरकाः भवन्ति, तदैव शिक्षणं सार्थकं भवति।

संस्कृतसम्बर्द्धनाय प्रचाराय चास्माभिरादौ चतुर्भिहेतुभिः परिपूर्णैर्भाव्यम्। तत्र खलु अध्ययनं, अर्थज्ञानं, आचरणं अध्यापनञ्च प्रतीयन्ते- यथोक्तम्

**''अधीतिबोधाचरणप्रचारणैः''**10

1970 ईसवीयतमेवर्षे भारतसर्वकारेण संस्कृतसम्बर्द्धनाय राष्ट्रियसंस्कृतसंस्थानं संस्थापितम्। तथैव 1982 तमे वर्षे संस्कृतप्रचारप्रसाराय संस्कृतभारती नाम्ना एकं सामाजिकं संघटनं स्थापितम्। अन्यान्यपि बहुविधानि संस्थानानि संस्कृत-अकादम्यश्च वर्तन्ते देशेऽस्मिन् संस्कृतसम्बर्द्धनाय प्रचाराय च।

संस्कृतसम्बर्द्धनप्रचारप्रसारश्च बहुभिः प्रकारैः विधातुं शक्यते-

(1) **संस्कृतभाषाव्यवहारः** - संस्कृतज्ञाः अध्येतारश्च संस्कृतमाश्रित्यैव अधिकाधिकं व्यवहरेयुः। पत्रादिव्यवहारे वादविवादे भाषणे लेखने दूरभाषे च संस्कृतमेव प्रयुञ्जीरन्।

(2) **व्याकरणस्य सरलीकरणम्** - संस्कृतप्रचाराय संस्कृतव्याकरणं सरलीकरणीयम्। व्याकरणनियमाः प्रयोगशैल्या शिक्षणीयाः।

(3) **शिविरायोजनम्** - दशदिवसीय-त्रैमासिकसम्भाषणशिविरायोजनं भवितव्यं नूनमेव।

(4) **शिक्षकप्रशिक्षणम्** - बहूनां संस्कृतशिक्षकाणां संस्कृतभाषायां, नैपुण्यं न भवति, अतः तेषां कृते वर्षे एकवारं प्रशिक्षणकार्यक्रमो भवेत्। येन ते संस्कृतभाषणे दक्षतां लभेरन्।

(5) **पत्राचारपाठ्यक्रमः** - ये खलु संस्कृतजिज्ञासवः सम्भाषणशिविराणि कर्तुम शक्ताः, तेभ्यः पत्राचारमाध्यमेन संस्कृतं पाठयितुं शक्यते।

(6) **संस्कृतस्यानिर्वायशिक्षणम्** – हिन्दी–आंग्लभाषाभ्यां सहैव संस्कृतमपि सर्वेषु विद्यालेष्वनिवर्यं स्यात्। प्रार्थना सभा अपि संस्कृतभाषायां स्युः। प्रार्थनासभासु संस्कृतसूक्तिरेका तस्या भावार्थः छात्रेभ्यः मञ्चात् शिक्षणीयः।

(7) **निमन्त्रणपत्रम्** – यथा किल सर्वेऽपि संस्काराः संस्कृतभाषया संपाद्यन्ते, तथैव विवाहादिसंस्काराणां निमन्त्रणपत्राणि अपि संस्कृतभाषायामेव प्रकाशनीयानि।

(8) **पठनपाठनपद्धतिपरिष्कारः** – संस्कृतस्य प्रचारार्थमावश्यकम् एतद्यत् पठनपाठनप्रणाली अधुना वैज्ञानिकीं पद्धतिमनुसरेत्। आधुनिककालानुसारमपि भवेत्।

(9) **गुरुकुलस्थापनम्** – इदानीमाधुनिकांग्लविद्यालयाः स्थाप्यन्ते जनैः। ते खलु विद्यालयाः नैतिकचारित्रिकदृष्ट्या शून्याः। तर्हि साम्प्रतं गुरुकुलसदृशा विद्यालयाः संस्थापनीयाः। यत्र संस्कृतेन सहान्ये विषया अपि भवेयुः।

(10) **संस्कृतपरिवारः** – उच्चपदं सम्प्राप्य नालमिति संस्कृतज्ञैः। तदनु स्वपुत्र–पुत्रीश्च संस्कृतं सम्पाठ्य संस्कृतपरिवारा निर्मेयाः।

(11) **सर्वकारसहयोगः** – सर्वकारस्य कर्तव्यमेतद् यत् स संस्कृतज्ञानम् आद्रियेत, संस्कृतप्रचारे साहाय्यमाचरेत्, राजकीयकार्येषु संस्कृतमनिवार्यं कुर्यात्, संस्कृतं पोषयेच्च।

अन्या अपि बहुविधा उपाया भवितुं शक्यन्ते संस्कृतप्रचाराय मयात्रैतावदेव प्रस्तूत्य विरम्यते।

## संदर्भसूची

1. मनुस्मृतिः - 2.20 ।

2. संस्कृतविषयक–विशिष्टपरिच्छेदः ।

3. फोर्ब्सपत्रिका जुलाई 1987 की एक रिपोर्ट में।

4. व्याकरणमहाभाष्यम् - 6-3-109 ।

5. भारतमाताब्रूते - 9-84 ।

6. भारतमाताब्रूते - 9-85

7. डॉ. सुनीतिकुमार चटर्जी प्रथमायोगस्य प्रपत्रम् - 1955-56

8. मालविकाग्निमित्रम् - 1-6

9. काव्यप्रकाशक:, प्रथमोल्लास: काव्यप्रयोजनम्।

10. नैषधीयचरितम् - 1-4